# Shri Nandikeshapancharatnamalika Stuti

# શ્રીનન્દિકેશપઞ્ચરત્નમાલિકાસ્તુતિઃ

## Document Information

Text title : Shri Nandikeshapancharatnamalika Stuti

File name : nandikeshapancharatnamAlikAstutiH.itx

Category : shiva, pancharatna, stuti, shankarAchArya

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીનન્દિકેશપઞ્ચરત્નમાલિકાસ્તુતિઃ

નમજ્જનાખિલાશુભાશુશુક્ષણિં નગસ્થિતં
નગેન્દ્રજાપતિપ્રિયં નરાશભઙ્ગવિક્રમમ્ ।
નિતાન્તમીશસન્નિધૌ ચ ભક્તવર્ગસન્નુતં
નમામિ નન્દિકેશ્વરં શિલાદજં ગણેશ્વરમ્ ॥ ૧॥

દિગીશ્વરાર્ચિતાઙ્ઘ્રિ પઙ્કજાતમદ્ભુતાકૃતિં
નિતાન્તશમ્ભુનર્તનાત્તમદ્દલં વૃષાનનમ્ ।
દિવાકરક્ષપેશવહ્નિ લોચનત્રયોજ્જ્વલં
નમામિ નન્દિકેશ્વરં શિલાદજં ગણેશ્વરમ્ ॥ ૨॥

પુરા હિ જાતુ રક્ષસામધીશ્વરં સ્વમાનનં
હસન્તમીક્ષ્ય કોપતઃ શશાપ યો વૃષેશ્વરઃ ।
તથૈવ વિષ્ણુવાહનઃ પ્રશિક્ષિતશ્ચ લીલયા
નમામિ નન્દિકેશ્વરં શિલાદજં ગણેશ્વરમ્ ॥ ૩॥

મુધા પરો મુકુન્દ એવ સર્વદેવતાસ્વિતિ
પ્રજલ્પયન્તમગ્રતો મુનિં પરાશરાત્મજમ્ ।
ક્રુધા સ્વકીયહુઙ્કૃતેરશિક્ષયચ્ચ યોગિરાટ્
નમામિ નન્દિકેશ્વરં શિલાદજં ગણેશ્વરમ્ ॥ ૪॥

મુહુર્મુહુર્જપન્વરં પરં ચ રૌદ્રમાદરાત્
અવાપ યો મહેશ્વરાશ્ચ નિત્યનિર્વિકલ્પતામ્ ।
સુકેતુતાં પ્રવાહતાં ગણેશતાં ચ સામ્યતાં
નમામિ નન્દિકેશ્વરં શિલાદજં ગણેશ્વરમ્ ॥ ૫॥

સુપઞ્ચરત્નમાલિકામિમાં પઠન્તિ યે નરાઃ
સુપુત્રમિત્રભૃત્યધાન્ય સત્કલત્રસમ્પદઃ ।
અરોગતાં ચ યોગસિદ્ધિમપ્યહો યદીપ્સિતં
સમૃદ્ધિમપ્યયાચિતં ભજન્તિ વાગ્વિલાસતામ્ ॥ ૬॥

ઇતિ શ્રીશઙ્કરભગવત્પાદવિરચિતા શ્રીનન્દિકેશપઞ્ચરત્નમાલિકાસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Nandikeshapancharatnamalika Stuti*
pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*